# Shri Dakshinakalikayah Trailokyamohanakavacham

# શ્રીદક્ષિણકાલિકાયાઃ ત્રૈલોક્યમોહનકવચમ્

## Document Information

Text title : Trailokyamohanakaaliikavacham

File name : trailokyamohanakaaliikavacham.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, Rajani Arjun Shankar

Description-comments : rudrayAmale deviishankarasa.nvAde

Latest update : February 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# શ્રીદક્ષિણકાલિકાયાઃ ત્રૈલોક્યમોહનકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીદેવ્યુવાચ ।
દેવદેવ! મહાદેવ! સંસારપ્રીતિકારક ।
સર્વવિદ્યેશ્વરી-વિદ્યાકવચં કથયધ્રુવમ્ ॥ ૧॥ (કથયાદ્ભુતામ્)

શ્રીશિવ ઉવાચ ।
શ ૃણુ દેવિ મહાવિદ્યાં સર્વવિદ્યોત્તમોત્તમામ્ ।
સર્વેશ્વરીં મહાવિદ્યાં સર્વદેવપ્રપૂજિતામ્ ॥ ૨॥

યસ્યાઃ કટાક્ષમાત્રેણ ત્રૈલોક્યવિજયી હરઃ ।
બભૂવ કમલાનાથો વિષ્ણુર્બ્રહ્મા પ્રજાપતિઃ ॥ ૩॥ (વિભુર્બ્રહ્મા)

શચીસ્વામી દેવનાથો યમોઽપિ ધર્મનાયકઃ । (યમનાયકઃ)
ત્રૈલોક્યપાવની ગઙ્ગા કમલા શ્રીર્હરિપ્રિયા ॥ ૪॥

દિનસ્વામી રવિશ્ચન્દ્રો નિશાપતિર્ગ્રહેશ્વરઃ ।
જલાધિપશ્ચ વરુણો કુબેરોઽપિ ધનેશ્વરઃ ॥ ૫॥

અવ્યાહતગતિર્વાયુર્ગજાસ્યો વિઘ્નનાશકઃ । (વિઘ્નનાયકઃ)
વાગીશ્વરઃ સુરાચાર્યો દૈત્યાચાર્યો ગુરુઃ કવિઃ ॥ ૬॥ (મહાકવિઃ)

એવં હિ સર્વદેવાશ્ચ સર્વસિદ્ધિશ્વરાઃ પ્રિયે ।
તસ્યાસ્તુ કવચં દિવ્યં મન્ત્રરૂપં વિભાવય ॥ ૭॥

ૐ અસ્ય શ્રીદક્ષિણકાલીકવચમન્ત્રસ્ય ભૈરવ ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્મશાનકાલી દેવતા,
ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
(ઋષ્યાદિ ન્યાસઃ ।
શ્રીમહાકાલભૈરવાય નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।

શ્રીદક્ષિકાલિકાદેવતાયૈ નમઃ હૃદિ ।
ધર્માર્થકામમોક્ષાર્થે પાઠે વિનિયોગાય નમઃ અઞ્જલૌ ।)

લલાટં પાતુ ચ ક્રીં મે હરેણારાધિતા સદા ।
નેત્રે મે રક્ષતુ ક્રીં ક્રીં વિષ્ણુના સેવિતા પુરા ॥ ૮॥

ક્રીં હૂઁ હ્રીં નાસિકાં પાતુ બ્રહ્મણા સેવિતા પુરા ।
ક્રીં ક્રીં ક્રીં વદનં પાતુ શક્રેણારાધિતા સદા ॥ ૯॥

ક્રીં સ્વાહા શ્રવણં પાતુ યમેનૈવ પ્રપૂજિતા ।
ક્રીં હૂઁ હ્રીં સ્વાહા રસનાં ગઙ્ગયા સેવિતાઽવતુ ॥ ૧૦॥

દન્તપઙ્ક્તિં સદા પાતુ ૐ ક્રીં હૂઁ હ્રીં સ્વાહા મમ ।
ભુક્તિમુક્તિપ્રદા કાલી શ્રિયા નિત્યં સુસેવિતા ॥ ૧૧॥

ઓષ્ઠાધરં સદા પાતુ ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં મમ
સૂર્યેણારાધિતા વિદ્યા સર્વસિદ્ધિ-પ્રદાયિકા ॥ ૧૨॥

કણ્ઠં પાતુ મહાકાલી ૐ ક્રીં હ્રીં મેં સ્વાહા મમ ।
ચન્દ્રેણારાધિતા વિદ્યા ચતુર્વર્ગફલપ્રદા ॥ ૧૩॥

હસ્તયુગ્મં સદા પાતુ ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં સ્વાહા ।
સૌખ્યદા મોક્ષદા કાલી વરુણેનૈવ સેવિતા ॥ ૧૪॥

ૐ ક્રીં ક્રીં હૂઁ હ્રીં ફટ્ સ્વાહા, હૃદયં પાતુ સર્વદા ।
સર્વસમ્પત્પ્રદા કાલી કુબેરેણોપસેવિતા ॥ ૧૫॥

ઐં હ્રીં ૐ ઐં હૂઁ ફટ્ સ્વાહા સ્તનદ્વન્દ્વં સદાવતુ ।
વાયુનોપાસિતા કાલી યશોબલ-સુખપ્રદા ॥ ૧૬॥

ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં ફટ્ ચ સા પાતુ જઠરં મમ ।
સર્વસિદ્ધિપ્રદા કાલી ગણનાથેન સેવિતા ॥ ૧૭॥

ક્રીં દક્ષિણે કાલિકે હ્રીં સ્વાહા નાભિં મમાઽવતુ ।
સિદ્ધિબુદ્ધિકરી કાલી ગુરુણા સેવિતા પુરા ॥ ૧૮॥

લિઙ્ગં પાતુ સદા હૂઁ હૂઁ દક્ષિણે કાલિકે હ્રીં હ્રીં ।
શુક્રેણારાધિતા કાલી ત્રૈલોક્ય-જયદાયિની ॥ ૧૯॥

પાત્વણ્ડ-કોશં ફટ્ ક્રીં ક્રીં ,દક્ષિણે કાલિકે સ્વાહા ।
ધરયા સેવિતા વિદ્યા સર્વરત્ન-પ્રદાયિની ॥ ૨૦॥

પાતુ ગુદં ક્રીં ક્રીં દક્ષિણે કાલિકે હ્રીં હ્રીં સ્વાહા ।
દ્વાદશી ચ મહાવિદ્યા રાઘવેણાર્ચિતા સદા ॥ ૨૧॥

જાનુની પાતુ ૐ ક્રીં ક્રીં દક્ષિણે કાલિકે સ્વાહા ।
એકાદશી મહાવિદ્યા મેઘનાદેન સેવિતા ॥ ૨૨॥

ક્રીં ક્રીં દક્ષિણે કાલિકે હ્રીં હ્રીં સ્વાહા જઙ્ઘેઽવતુ
દ્વાદશી ચ મહાવિદ્યા પ્રહ્લાદેન ચ સેવિતા ॥ ૨૩॥

ક્રીં હૂઁ હ્રીં દક્ષિણે કાલિકે ક્રીં હૂઁ હ્રીં સ્વાહાઽવતુ ।
ચતુર્દશી પાદયુગ્મં ગુરુદેવેન સેવિતા ॥ ૨૪॥

ક્રીં હૂઁ હ્રીં દક્ષિણે કાલિકે ક્રીં હૂઁ હ્રીં તથાઽઙ્ગુલીઃ ।
પાતુ મે દ્વાદશી કાલી ક્ષેત્રપાલેન સેવિતા ॥ ૨૫॥

ૐ ક્રીં હૂઁ હ્રીં દક્ષિણે કાલિકે ક્રીં હૂઁ હ્રીં સ્વાહા ચ ।
નખાન્સર્વાન્સદા પાતુ પઞ્ચદશી ગ્રહેશ્વરી ॥ ૨૬॥

ક્રીં ક્રીં ક્રીં હૂઁ હૂઁ હ્રીં હ્રીં દક્ષિણે કાલિકે ક્રીં ક્રીં ક્રીં ।
મમ પૃષ્ઠે સદા પાતુ ષોડશી પરમેશ્વરી ॥ ૨૭॥

ક્રીં ક્રીં ક્રીં પાતુ રોમાણિ હૂઁ હૂઁ રક્ષતુ વર્મણિ ।
માંસં પાતુ સદા હ્રીં હ્રીં રક્તં દક્ષિણકાલિકા ॥ ૨૮॥

ક્રીં ક્રીં ક્રીં પાતુ મે ચાસ્થિ મજ્જાં હૂઁ હૂઁ સદાઽવતુ ।
હ્રીં હ્રીં શુક્રં સદા પાતુ રંધ્રં સ્વાહા મમાઽવતુ ॥ ૨૯॥

દ્વાવિંશત્યક્ષરી વિદ્યા સર્વલોકેષુ દુર્લભા ।
મહાવિદ્યેશ્વરી વિદ્યા સર્વતન્ત્રેષુ ગોપિતા ॥ ૩૦॥

સૂર્યવંશેન સોમેન રામેણ જમદગ્નિના ।
જયન્તેન સુનન્દેન બલિના નારદેન ચ ॥ ૩૧॥

વિભીષણેન બાણેન ભૃગુણા કશ્યપેન ચ ।
કપિલેન વસિષ્ઠેન ધૌમ્યેન ત્રિપુરેણ ચ ॥ ૩૨॥

માર્કણ્ડયેન ધ્રુવેણૈવ દ્રોણેન સત્યભામયા ।
ઋષ્યશ‍ૃઙ્ગેન કર્ણેન ભારદ્વાજેન સંયુતા ॥ ૩૩॥

સર્વૈરારાધિતા વિદ્યા જરામૃત્યુ-વિનાશિની ।

પૂર્ણવિદ્યા મહાકાલી વિદ્યારાજ્ઞી પ્રકીર્તિતા ॥ ૩૪॥

કાલી કપાલિની કુલ્લા કુરુકુલ્લા વિરોધિની ।
વિપ્રચિત્તા તથોગ્રોગ્ર-પ્રભા દીપ્તા ઘનત્વિષા ॥ ૩૫॥

નીલા ઘના બલાકા ચ માત્રા મુદ્રા મિતાઽપિ ચ ।
એતાઃ સર્વા ખડ્ગધરા મુણ્ડમાલા-વિભૂષણા ॥ ૩૬॥

હૂઁ હૂઁકારાટ્ટહાસેન સર્વત્ર પાતુ માં સદા ।
બ્રહ્માણી પાતુ માં પૂર્વે ચાગ્નેય્યાં વૈષ્ણવી તથા ॥ ૩૭॥

માહેશ્વરી પાતુ યામ્યે ચામુણ્ડા નૈરૃતે સદા ।
કૌમારી વારુણે પાતુ વાયવ્યે ચાઽપરાજિતા ॥ ૩૮॥

વારાહી ચોત્તરે પાતુ ચેશાન્યાં નારસિંહિકા ।
અધ ઊર્ધ્વે પાતુ કાલી પાર્શ્વે પૃષ્ઠે ચ કાલિકા ॥ ૩૯॥

જલે સ્થલે ચ પાતાલે શયને ભોજને ગૃહે
રાજસ્થાને કાનને ચ વિવાદે મરણે રણે ॥ ૪૦॥

પર્વતે પ્રાન્તરે શૂન્યે પાતુ માં કાલિકા સદા ।
શવાસને શ્મશાને વા શૂન્યાગારે ચતુષ્પથે ॥ ૪૧॥

યત્ર યત્ર ભયપ્રાપ્તિઃ સર્વત્ર પાતુ કાલિકા ।
નક્ષત્રતિથિવારેષુ યોગ-કરણયોરપિ ॥ ૪૨॥

માસે પક્ષે વત્સરે ચ દણ્ડે યામે નિમેષકે ।
દિવારાત્રૌ સદા પાતુ સન્ધ્યયોઃ પાતુ કાલિકા ॥ ૪૩॥

સર્વત્ર કાલિકા પાતુ કાલિકા પાતુ સર્વદા ।
સકૃદ્યઃ શ઼ૃણુયાન્નિત્યં કવચં શિવનિર્મિતમ્ ॥ ૪૪॥

સર્વપાપં પરિત્યજ્ય ગચ્છેચ્છિવસ્ય ચાલયમ્ ।
ત્રૈલોક્યમોહનં દિવ્યં દેવતાનાં સુદુર્લભમ્ ॥ ૪૫॥

યઃ પઠેત્સાધકાધીશઃ સર્વકર્મ-જયાન્વિતઃ ।
સર્વધર્મે ભવેદ્ધર્મી સર્વવિદ્યેશ્વરેશ્વરઃ ॥ ૪૬॥

કુબેર ઇવ વિત્તાઢ્યઃ સુવાણી કોકિલસ્વરઃ ।
કવિત્વે વ્યાસસદૃશો ગણેશવચ્છ્રુતિધરઃ ॥ ૪૭॥

કામદેવસમો રૂપે વાયુતુલ્યઃ પરાક્રમે ।
મહેશ ઇવ યોગીન્દ્ર ઐશ્વર્યે સુરનાયકઃ ॥ ૪૮॥

બૃહસ્પતિસમો ધીમાન્ જરામૃત્યુ-વિવર્જિતઃ ।
સર્વજ્ઞઃ સર્વદર્શી ચ નિષ્પાપઃ સકલપ્રિયઃ ॥ ૪૯॥

અવ્યાહતગતિઃ શાન્તો ભાર્યાપુત્ર-સમન્વિતઃ ।
યો દેહે કુરુતે નિત્યં કવચં દેવદુર્લભમ્ ॥ ૫૦॥

ન શોકો ન ભયં ક્લેશો ન રોગો ન પરાજયઃ ।
ધનહાનિર્વિષાદોઽપિ પરવ્યાધિર્ભવેન્નહિ ॥ ૫૧॥

સઙ્ગ્રામેષુ જયેચ્છત્રૂન્ યથા વહ્નિર્દહેદ્વનમ્ ।
બ્રહ્માસ્ત્રાસ્ત્રાન્ય-શસ્ત્રાણિ પશવઃ કણ્ટકાદયઃ ॥ ૫૨॥

તસ્ય દેહં ન ભિનત્તિ વજ્રાધિકં ભવેદ્વપુઃ ।
ગ્રહભૂતપિશાશ્ચ યક્ષ રાક્ષસ કિન્નરાઃ ॥ ૫૩॥

સર્વે દૂરાત્પલાયન્તે હિંસકો નશ્યતિ ધ્રુવમ્ ।
તદ્દેહં ન દહેદગ્નિર્ન તાપયતિ ભાસ્કરઃ ॥ ૫૪॥

ન શોષયતિ વાતોઽપિ ન ક્લેદં કુરુતે પયઃ ।
પુત્રવત્પાલ્યતે કાલ્યા ન હિમં કુરુ તે શશી ॥ ૫૫॥

જલ-સૂર્યેન્દુ-વાતાનાં સ્તમ્ભકે નાત્ર સંશયઃ ।
બહુ કિં કથયિષ્યામિ સર્વસિદ્ધિમુપાલભેત્ ॥ ૫૬॥

રાજ્યં ભોગં સુખં લબ્ધ્વા સ્વેચ્છયાપિ શિવો ભવેત્ ।
મોહન-સ્તમ્ભનાકર્ષ-મારણોચ્ચાટનં ભવેત્ ॥ ૫૭॥

કાકવન્ધ્યા ચ યા નારી વન્ધ્યા વા મૃતપુત્રિકા ।
કણ્ઠે વા દક્ષિણે બાહૌ લિખિત્વા ધારયેદ્યદિ ॥ ૫૮॥

તદા પુત્રો ભવેત્સત્યં ચિરાયુઃ પણ્ડિતઃ શુચિઃ ।
સ્વામિનો વલ્લભા સાપિ ધનધાન્ય-સુતાન્વિતા ॥ ૫૯॥

ઇદં કવચમજ્ઞાત્વા યો જપેત્કાલિકામનુમ્ ।
ધ્યાનેન કોટિજન્મેન તસ્ય વિદ્યા ન સિદ્ધ્યતિ ॥ ૬૦॥

પદે પદે ભવેદ્દુખં લોકાનાં નિન્દિતો ધ્રુવમ્ ।
ઇહલોકે ભવેદ્દુઃખી પરે ચ નરકં વ્રજેત્ ॥ ૬૧॥

ગુરું મનું સમં જ્ઞાત્વા યઃ પઠેત્કવચોત્તમમ્ ।
તસ્ય વિદ્યા ભવેત્સિદ્ધા સત્યં સત્યં વરાનને ॥ ૬૨॥

ય ઇદં કવચં દિવ્યં પ્રકાશ્ય સિદ્ધિહા ભવેત્ ।
ભક્તાય શ્રેષ્ઠપુત્રાય સાધકાય પ્રકાશયેત્ ॥ ૬૩॥

॥ ઇતિ શ્રીરુદ્રયામલે દેવીશઙ્કર સંવાદે
ત્રૈલોક્યમોહનં નામ કવચં અથવા દક્ષિણાકાલિકાકવચં સમ્પૂર્ણમ્ ॥

Encoded Ravin Bhalekar ravibhalekar@hotmail.com
Proofread by Ravin Bhaleka, Rajani Arjun Shankar

---

*Shri Dakshinakalikayah Trailokyamohanakavacham*
pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*